CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वैदिकं देवीसूक्तम्

ॐ अहं रुद्रेभिरित्यष्टर्चस्य सूक्तस्य वागांभृणी ऋषिः। श्रीआदिशक्तिर्देवता, त्रिष्टुप्छंदः, द्वितीया

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जगती, श्रीजगदम्बाप्रीत्यर्थे सप्तशतीजपान्ते जपे विनियोगः ।

ॐ अहंरुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुतविश्वदेवैः ।
अहंमित्रावरुणोभाबिभर्म्यहमिंद्राग्नीअहमश्विनोभा ।
अहंसोममाहनसंबिभर्म्यहंत्वष्टारमुतपूषणंभगम् ।
अहंदधामिद्रविणंहविष्मतेसुप्राव्येयजमानायसुन्वते।
अहंराष्ट्रीसङ्गमनीवसूनाञ्चिकितुषीप्रथमायज्ञियानाम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तांमा॑दे॒वाव्य॑दधुः पुरु॒त्रा भूरि॑स्थात्रां॒ भूर्या॑वे॒शय॑न्तीम् ।
मया॒सोअन्न॑मत्ति॒योवि॒पश्य॑ति॒यः प्रा॑णि॒ति॒यई॑शृ॒णोत्यु॒क्तम् ।
अमृ॑तवो॒मांत॒उप॑क्षियंति॒श्रुधि॒श्रुत॑श्रद्धि॒वंतेवदामि ।
अ॒हमे॒वस्व॒यमि॒दंव॑दामि॒जुष्टं॑दे॒वेभि॑रु॒तमानु॑षेभिः ।
यंका॑मये॒ तंत॑मु॒ग्रंकृ॑णोमि॒तं ब्रह्मा॑णं॒तमृ॒षिं॒तंसु॑मे॒धाम् ॥
अ॒हंरु॒द्रा॒यध॒नुरा॑त॑नोमि॒ब्रह्म॒द्विषे॒शर॑वे॒हंत॒वाऽउ॑ ।
अ॒हंज॑ना॑यस॒मदं॑कृणोम्य॒हंद्यावा॑पृथि॒वीआ॑वि॒वेश ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अहंसुवे पितरमस्य मूर्धन्मम योनिरप्स्वन्तः समुद्रे ।
ततो वितिष्ठे भुवनानि विश्वोतामूं द्यां वर्ष्मणोपस्पृशामि।
अहमेव वात इव प्रवाम्यारभमाणा भुवनानि विश्वा ।
परो दिवा पर एना पृथिव्यैतावती महिना संबभूव ॥२॥

इति वैदिकं देवीसूक्तं समाप्तम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तान्त्रिकं देवीसूक्तम्



नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियधाः प्रणताः स्म ताम् ॥१॥
रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः ।
ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः ॥२॥
कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कुम्यै नमो नमः ।
नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः ॥३॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै ।
ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥४॥
अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः ।
नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥५॥
या देवी सर्वभूतेषु विष्णुमायेति शब्दिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६॥
या देवी सर्वभूतेषु चेतनेत्यभिधीयते ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥७॥

या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८॥

या देवी सर्वभूतेषु निद्रारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥९॥

या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१०॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

या देवी सर्वभूतेषु छायारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥११॥
या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१२॥
या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१३॥
या देवी सर्वभूतेषु क्षान्तिरूपेण संस्थिता ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१४॥
या देवी सर्वभूतेषु जातिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१५॥
या देवी सर्वभूतेषु लज्जारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१६॥
या देवी सर्वभूतेषु शान्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१७॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

या देवी सर्वभूतेषु श्रद्धारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१८॥
या देवी सर्वभूतेषु कान्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१९॥
या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२०॥
या देवी सर्वभूतेषु वृत्तिरूपेण संस्थिता ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नमस्तस्यै नमस्तस्यै नमस्तयै नमो नमः ॥२१॥

या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२२॥

या देवी सर्वभूतेषु दयारूपेण संस्थिता ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२३॥

या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२४॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

या देवी सर्वभूतेषु मातृरूपेण संस्थिता ।
मनस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२५॥

या देवी सर्वभूतेषु भ्रान्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२६॥

इन्द्रियाणामधिष्ठात्री भूतानां चाखिलेषु या ।
भूतेषु सततं तस्यै व्याप्त्यै देव्यै नमो नमः ॥२७॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगत् ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२८॥

स्तुता सुरैः पूर्वमभीष्टसंश्रया-
त्तथा सुरेन्द्रेण दिनेषु सेविता ।
करोतु सा नः शुभहेतुरीश्वरी
शुभानि भद्राण्यभिहन्तु चापदः ॥२९॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

या साम्प्रतं चोद्धतदैत्यतापितै-
रस्माभिरीशा च सुरैर्नमस्यते ।
या च स्मृता तत्क्षणमेव हन्ति नः
सर्वापदो भक्तिविनम्रमूर्तिभिः ॥३०॥

गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादान्मेहेश्वरि ॥३१॥

इति तान्त्रिकं देवीसूक्तम् समाप्तम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अपराधक्षमापनस्तोत्रम्

॥ श्रीगणेशाय नमः ॥

अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽयमिति मां मत्वा क्षमस्व परमेश्वरि ॥१॥
आवाहनं न जानामि न जानामि विसर्जनम् ।
पूजां चैव न जानामि क्षम्यतां परमेश्वरि ॥२॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि ।
यत्पूजितं मया देवि परिपूर्णं तदस्तु मे ॥३॥

अपराधशतं कृत्वा जगदम्बेति चोच्चरेत् ।
यां गतिं समवाप्नोति न तां ब्रह्मादयः सुरा ॥४॥

सापराधोऽस्मि शरणं प्राप्तस्त्वां जगदम्बिके ।
इदानीमनुकंप्योऽहं यथेच्छसि तथा कुरु ॥५॥

अज्ञानाद्विस्मृतेर्भ्रान्त्या यन्न्यूनमधिकं कृतम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरि ॥६॥
कामेश्वरि जगन्माताः सच्चिदानन्दविग्रहे ।
गृहाणार्चामिमां प्रीत्या प्रसीद परमेश्वरि ॥७॥
गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादात्सुरेश्वरि ॥८॥

इति देव्यपराधक्षमापनस्तोत्रं सम्पूर्णम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

देव्यपराधक्षमापन-स्तोत्रम्

॥ श्रीगणेशाय नमः ॥

न मन्त्रं नो यन्त्रं तदपि च न जाने स्तुतिमहो
न चाह्वानं ध्यानं तदपि च न जाने स्तुतिकथाः ।
न जाने मुद्रास्ते तदपि च न जाने विलपनं
परं जाने मातस्त्वदनुसरणं क्लेशहरणम् ॥ १ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विधेरज्ञानेन द्रविणविरहेणालसतया
विधेयाशक्यत्वात्तव चरणयोर्या च्युतिरभूत् ।
तदेतत्क्षन्तव्यं जननि सकलोद्धारिणि शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥ २ ॥

पृथिव्यां पुत्रास्ते जननि बहवः सन्ति सरलाः
परं तेषां मध्ये विरलतरलोऽहं तव सुतः ।
मदीयोऽयं त्यागः समुचितमिदं नो तव शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥ ३ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जगन्मातर्मातस्तव चरणसेवा न रचिता
न वा दत्तं देवि द्रविणमपि भूयस्तव मया ।
तथापि त्वं स्नेहं मयि निरुपमं यत्प्रकुरुसे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥ ४ ॥

परित्यक्ता देवा विविधविधिसेवाकुलतया
मया पञ्चाशीतेरधिकमपनीते तु वयसि ।
इदानीं चेन्मातस्तव यदि कृपा नापि भविता
निरालम्बो लम्बोदरजननि कं यामि शरणम् ॥ ५ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्वपाको जल्पाको भवति मधुपाकोपमगिरा
निरातङ्को रङ्को विरहति चिरं कोटिकनकैः ।
तवापर्णे कर्णे विशति मनुवर्णे फलमिदं
जनः को जानीते जननि जपनीयं जपविधौ ॥ ६ ॥

चिताभस्मालेपो गरलमशनं दिक्पटधरो
जटाधारी कण्ठे भुजगपतिहारी पशुपतिः ।
कपाली भूतेशो भजति जगदीशैकपदवीं
भवानि त्वत्पाणिग्रहणपरिपाटीफलमिदम् ॥ ७ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न मोक्षस्याकांक्षा भवविभववाञ्छापि च न मे
न विज्ञानापेक्षा शशिमुखि सुखेच्छापि न पुनः ।
अतस्त्वां संयाचे जननि जननं यातु मम वै
मृडानी रुद्राणी शिव शिव भवानीति जपतः ॥ ८ ॥

नाराधितासि विधिना विविधोपचारैः
किं रुक्षचिन्तनपरैर्न कृतं वचोभिः ।
श्यामे त्वमेव यदि किञ्चन मय्यनाथे
धत्से कृपामुचितमम्ब परं तवैव ॥ ९ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आपस्तु मग्नः स्मरणं त्वदीयं करोमि दुर्गे करुणार्णवेशि ।
नैतच्छठत्वं मम भावयेथाः क्षुधातृपार्ता जननीं स्मरन्ति ॥१०॥

जगदम्ब विचित्रमत्र किं परिपूर्णा करुणास्ति चेन्मयि ।
अपराधपरम्परावृतं न हि माता समुपेक्षते सुतम् ॥११॥

मत्समः पातकी नास्ति पापघ्नी त्वत्समा न हि ।
एवं ज्ञात्वा महादेवि यथा योग्यं तथा कुरु ॥ १२ ॥

इति श्रीमच्छङ्कराचार्यकृतं देव्यपराधक्षमापनस्तोत्रं सम्पूर्णम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्तोत्र-ग्रन्थाः

१ शिवमहिम्नस्तोत्रम् । शिवताण्डवस्तोत्रं, द्वादशज्योति-र्लिङ्गस्तोत्रं, शिवपञ्चाक्षरस्तोत्रं तथा शिवषडक्षरस्तोत्रसहितञ्च । ०–७५

२ शिवमहिम्नस्तोत्रम् । मूल संस्कृत, अन्वय, हिन्दी तथा अंग्रेजी भाषान्तर के सहित । व्याख्याकार—लक्ष्मीनारायण ओंकारलाल जोशी । २–५०

३ शिवमहिम्नस्तोत्रम् । हिन्दी भाषान्तर सहित । व्याख्याकार— लक्ष्मीनारायण ओंकारलाल जोशी । १–००

४ अर्धनारीश्वरस्तोत्रम् । अर्धनारीश्वरस्तुति, श्रीमदर्धनारीश्वराष्टोत्तरशत-नामावलिसहितञ्च । ०–७५

५ रामरक्षास्तोत्रम् । श्रीबुधकौशिकऋषिविरचितम् । ०–३०

६ ऋणमोचकमङ्गलस्तोत्रम् । ०–२०

७ दक्षिणामूर्तिस्तोत्रम् । श्रीशङ्कराचार्यविरचितम् ०–२०

८ ऋग्वेदोक्तं श्रीसुक्तम् । हिन्दी-मन्त्रार्थसहितं (लक्ष्मीपूजनविधि-श्रीसूक्त-सम्पुटितपुरश्चरणविधि-वेदोक्तलक्ष्मीसूक्तपुराणोक्तश्रीसूक्त - धनदास्तोत्र-धनदाकवचादिसहितम्) १–५०

९ काली-कवचम् । श्रीमहाकालीस्तोत्रम्, कालीशतनामस्तोत्रसहितम् । ००–५०

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.